M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 569

Title: Tarkamritam

569

तर्कामृतम् ॥

Tarkāmritam		: Title
Jagadeesha		: Author
		: Editor
		: Year, Vols.
		: Publisher
569		: Remarks

॥ श्रीगणेशाय नमः ॥ ॥ ब्रह्माद्यानिखिलाश्चिंताः स्थिदशासंदोहाः सदाभीष्टदाः स्वात्मान
॥१॥ प्रणमाय यच्चमनसो वृत्तिः समस्ताद्धृ ॥ श्रीविश्वेश्वरणं वृजंभवभक्ष्यंसैकबीजं परं हृत्पद्मे
विनिधाय तन्निरूपमं तत्कल्पितं तन्यते ॥१॥ ॥ अथश्रुतिः श्रूयते आत्मावारे द्रष्टव्यः श्रोत
व्यो मंतव्यो निदिध्यासितव्य इति । अस्यार्थः । मुमुक्षुणा आत्मा द्रष्टव्यः मुमुक्षोरात्मदर्शनं नि
ष्टसाधनमिति यावत् । आत्मदर्शनोपायः क इत्यत आह श्रोतव्य इत्यादि तेनार्थक्रमेण शाब्द
क्रमस्य कोभवति । अग्निहोत्रं जुहोति यवागूं पचतीत्यादिवत् । तथा च श्रवणमनननि
दिध्यासनानि तत्वज्ञानजनकानीत्युक्तं भवति । अथ श्रुतितः कृतात्मश्रवणस्य म
ननेधिकारः मननं चात्मन इतरभिन्नत्वेनानुमानं तच्च भेदप्रतियोगीतरज्ञानसा
ध्यं तथा चेतर एव के तदर्थं पदार्थनिरूपणं संक्षेपतः ॥ सामान्यतः पदार्था द्विविधाः ।
भावो भावश्चाभावः षड्विधः । द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् । तत्र द्रव्यत्व राम
॥२॥

गुणत्वकर्मत्वानि जातयः ॥ सामान्यत्वादीन्युपाधयः । द्रव्याणि नव । पृथिव्यप्तेजोवा
य्वाकाशकालदिगात्ममनांसि । आकाशत्वकालत्वदिक्त्वान्युपाधयः । अन्यानि
जातयः । तत्र रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व
गुरुत्वद्रवत्वसंस्काराश्चतुर्दश गुणाः पृथिव्याः । तत्रैव गंधं विहाय स्नेहं विनियो
ज्य चतुर्दश गुणाः जलस्य ॥ रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागप
रत्वापरत्वद्रवत्वसंस्कारा एकादश गुणास्तेजसः । स्पर्शसंख्यापरिमाणपृथ
क्त्वसंयोगविभागपरत्वापरत्वसंस्कारा नव गुणाः वायोः ॥ शब्दसंख्यापरिमाण
पृथक्त्वसंयोगविभागाः षड्गुणाः आकाशस्य । संख्यापरिमाणपृथक्त्वसंयोग
विभागाः पंच गुणाः कालदिशोः । संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धि
सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्दश गुणाः आत्मनः । संख्या

॥२॥ परिमाणपृथक्त्वसंयोगविभागपरत्वसंस्काराअष्टौमनसः। ज्ञानेच्छाकृतिसंख्याकृतिसंख्या
दिपंचकाःपंचगुणाईश्वरस्य। तथा च वायोःनवैकादशतेजसोगुणाःजलक्षितिप्राणभृ
तां चतुर्दश॥ दिक्कालयोःपंचषडेवचांबरे महेश्वरेष्टौ मनसस्तथैवच। तत्र पृथिवीज
लतेजोवायवो द्विविधाः। परमाणवःसावयवाश्च आकाशकालात्मदिशो विभुस्व
पाः। मनःपरमाणुरूपं। तत्र सावयवाअनित्याः द्रव्याणिनित्यानि सावयवोपि
त्रिविधः। शरीरेंद्रियविषयभेदात्। मानुषाणां शरीरं पार्थिवं जलीयंशरीरं वरुण
लोकेप्रसिद्धं तैजसं शरीरं आदित्यलोके वायवीयं शरीरं वायुलोके। घ्राणेंद्रियं
पार्थिवं रसनेंद्रियं जलीयं चक्षुरिंद्रियं तैजसं त्वगिंद्रियं वायवीयं। श्रोत्रेंद्रियं क
र्णशष्कुल्यवच्छिन्नो नभःप्रदेशः। एतानि बहिरिंद्रियाणि। मनोंतरिंद्रियंतेनवहिं
द्रियाणि विषयाश्च शब्दादिरूपेण पंच प्रसिद्धाः। आत्माद्विविधः। जीवात्मा
परमात्मा च। तत्र जीवात्मानः प्रतिशरीरं भिन्नाः बंधमोक्षयोग्याः। परमात्माईश्वरः॥ तम
॥२॥

॥ अथाप्रत्यक्षाणि परमाणुद्व्यणुकेअप्रत्यक्षेत॥ उद्भूतरूपवत्वंयत्तानिपृथिवीजलतेजांसि
प्रत्यक्षाणि बहिर्द्रव्यप्रत्यक्षं प्रतिमहत्वेसत्युद्भूतरूपवत्वंप्रयोजकं॥ अथ द्रव्योत्पत्ति
प्रक्रिया। तत्रोत्पत्तिःकारणवतः अनन्यथासिद्ध[illegible] नियतपूर्ववृत्तिकारणं तत्वंकारणत्वं।
त्रिविधानि कारणानि। समवायिकारणं असमवायिकारणं निमित्तकारणानि। यत्समवेतं का
र्यमुत्पद्यते तत्समवायिकारणं यथापरमाणुर्द्व्यणुकस्य कपालंघटस्य समवायिकार
णसंबद्धं कारणमसमवायिकारणं यथापरमाणुद्वयसंयोगो द्व्यणुकस्य कपा
लरूपं घटरूपस्य एतदुभयभिन्नं यत्कारणं तन्निमित्तकारणं यथाद्व्यणुके ईश्वरः
घटे दंडः। एतत्कारणत्रयं भावकार्यमात्रस्य तत्रसमवायिकारणं सर्वत्र द्रव्यमेव।
असमवायिकारणं द्रव्ये गुणे गुणे गुणः कर्म च। कार्यमात्रं प्रतिसाधारणकारणा
नि। ईश्वरस्य ज्ञानेच्छाकृतयः प्रागभावकालदिगदृष्टानि। तत्र परमाणुद्वयसंयो

॥३॥

गात् द्व्यणुकमुत्पद्यते। संयुक्तद्व्यणुकत्रयात्त्रसरेणुः। एवं चतुरणुकादिक्रमात्तं कपाल
द्वयसंयोगेन घटो जायते। घटस्त्वन्त्यावयवी॥ अथ द्रव्यप्रमाणं कथ्यते। प्रत्यक्षद्र
व्ये प्रत्यक्षमेव प्रमाणं अतीन्द्रियेमानं तत्र त्रसरेणुस्तु साध्यदृष्टान्तत्वान्न साध्यं। विशेषोऽव
स्यते परमाणुद्व्यणुकानुमानं यथात्र त्रसरेणुः सावयवद्रव्यारब्धः बहिरिन्द्रि
यवेद्यद्रव्यत्वात् बहिरिन्द्रियवेद्यद्रव्यं यत् तत् सावयवद्रव्यारब्धं यथा घटः अत्र त्रस
रेणुः पक्षः सावयवद्रव्यारब्धत्वं साध्यं बहिरिन्द्रियवेद्यद्रव्यत्वादिति हेतुः घटो दृष्टा
न्तः अनेन द्व्यणुकः परमाणुश्च सिध्यति। आकाशं कायं शब्देन स्पर्शेन वानुमीयते।
शब्दो द्रव्याश्रितो गुणत्वात् यथा घटरूपं अनेन द्रव्यान्तरबाधात्। शब्दाश्रयत्वेनाकाशं
सिध्यति। पृथिव्यादिचयावृत्तिरयं स्पर्शो द्रव्याश्रितो गुणत्वात् यथा घटरूपं अनेन
द्रव्यानुमानेन द्रव्यान्तरबाधात्। स्पर्शाश्रयत्वेन वायुः सिध्यति। कालेप्रमाणं यथा।

राम ॥३॥

दिशोऽपि देशिकसंबंधेन सर्वोपाधिककारणत्वं॥ अथ गुणाः कथ्यन्ते। रूपरसगंधस्पर्शसंख्यापरिमा
णपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्का
रधर्माधर्मशब्दाश्चतुर्विंशतिर्गुणाः। अत्र रूपत्वादिजातिसर्वोऽपि वजातयः। [illegible] पं पृथिव्यादि
त्रयवर्त्ति। तच्च शुक्लकृष्णरक्तपीतचित्रादिभेदेन बहुविधं पृथिवीवर्त्ति स्वच्छशुक्लं ते
पं॰ तेजो जलवर्त्ति शुक्लभास्वरं तेजोवृत्ति। रसः पृथिवीजलयोः तत्र मधुरलवणक
टुतिक्ताम्लकषायाः षड्विधा रसाः पृथिव्यां जले मधुर एव रसः। गंधो द्विविधः सुरभि
रसुरभिश्च पृथिवीमात्रवृत्तिः। स्पर्शश्च पृथिव्यादिचतुष्टयवृत्तिः। स च त्रिविधः।
अनुष्णाशीतस्पर्शो वायुपृथिव्योः जले शीतः तेजस्युष्णः। संख्यापरिमाणपृथक्त्वसं
योगविभागा नवद्रव्यवृत्तयः। परत्वापरत्वे पृथिवीजलतेजोवायुमनोवृत्तिनी। बुद्धि
सुखदुःखेच्छाद्वेषप्रयत्नभावनाधर्माधर्मा आत्मवृत्तयः। गुरुत्वं पृथिवीजलवृत्ति। द्रवत्वं पृ

पृथिवीजलतेजोवृत्ति। तद्द्विविधं नैमित्तिकं सांसिद्धिकं च। आद्यं पृथिवीतेजसोः। द्वितीयं जले। स्ने
हो जलमात्रवृत्तिः। संस्कारः पृथिवीजलतेजोवाय्वात्ममनोवृत्तिः। स च त्रिविधः वेगो भावना स्थि
तिस्थापकश्च तत्र वेगः पृथिव्यादिचतुष्कमनोवृत्तिः। द्वितीयः आत्मवृत्तिः। तृतीयः पृ
थिव्यादिचतुष्टयवृत्तिः। शब्दो द्विविधः वर्णात्मको ध्वन्यात्मकः। आकाशमात्रवृत्तिः। रूपरस
गंधस्पर्शस्नेहसांसिद्धिकद्रवत्वशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाः
विशेषगुणाः। तथा चोक्तं रूपगंधौ रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः बुध्यादिभावनांतश्च
शब्दा वैशेषिका गुणाः। संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वनैमित्ति
कद्रवत्ववेगस्थितिस्थापकाः सामान्यगुणाः। अथ नित्यगुणाः। जलतेजोवायुपरमाणू
नां विशेषगुणाः परमाणुवृत्तिस्थितिस्थापकश्च विभूनां परमाणूनां चैकत्वपरिमाण
पृथक्त्वानि। ईश्वरेच्छाज्ञानकृतयश्च नित्यगुणाः॥ अथाप्रत्यक्षगुणाः॥ गुरुत्वधर्माध
र्मभावनास्थितिस्थापकाः। परमाणुद्व्यणुकवृत्तिगुणा अतीन्द्रियवृत्तिका

सामान्यगुणाः। उद्भूतरूपं विहायान्ये गुणा अतीन्द्रियाः। रूपरसगंधस्पर्शप्रत्यक्षे महत्त्वे स
मुद्भूतत्वप्रयोजके। [illegible] सामान्यगुणप्रत्यक्षे आश्रयप्रत्यक्षं। बुद्धिप्रत्यक्षे स्ववृत्तिविशिष्टात्मा
त्वं सुखादिप्रत्यक्षे स्ववृत्तिसुखत्वादिकमेव। अयं साधशब्दो विहाय प्रत्यक्षे॥ ॥ अ
थ गुणोत्पत्तिप्रक्रिया। अवयववृत्तिद्वित्वगुणा अवयविनि स्वसमानजातीयगुणान्
रभंते। पृथिवीविशेषगुणाः पाकजास्तु। द्विविधाः पाकप्रयोज्याः पाकजन्याश्च। कारणगु
णप्रक्रमजन्याः पाकप्रयोज्याः। अग्निसंयोगजन्या द्वितीयाः। श्यामघटस्याग्निसंयोगे
न रूपान्तरनाशानंतरं घटे रक्तरूपमुत्पद्यत इति नैयायिकमतं। अग्निसंयोगेन परमाणु
पाके सति परमाणौ रक्तरूपमुत्पद्यते पुनर्घटोत्पत्तौ सत्यां कारणगुणप्रक्रमेण घटे रक्त
रूपमुत्पद्यत इति वैशेषिकमतं। तथा कपाले नीलमेकदेशे पीतं यदि तदा घटे चित्ररूपमुत्प
द्यते। रसादावेवं सति अवयविनि रसो न जायते चित्ररसाद्यस्वीकारात्। गुरुत्वस्थिति
स्थापकपाकजानां कारणगुणप्रक्रमजन्यता। द्वित्वादयोऽपेक्षाबुद्धिजन्याः परिमाणं त्रि
विधं। अणुमहत्त्वह्रस्वदीर्घं च। कारणगुणप्रक्रमजन्यं स्वावयवबहुत्वजन्यं

यथा त्र्यसरेणः। न्नप्रवयवानां शिथिलसंयोगः प्रचयोषितजनकः। यथा तूलपरिमाणार
भकत्वं कारणगुणप्रक्रमजन्यं। ननु तत्र किं प्रमाणं। घटात्पटः पृथगिति प्रत्यक्षं तस्यान्यो
न्याभावविषयकत्वमिति चेन्न। अन्योन्याभावप्रतीतेरनुयोगिप्रतियोगिनीः समा
नविभक्तिकत्वनियमात्। यथा च घटेन पटस्तन्यान्याभावस्य पृथक्त्वरूपत्वे घटात
टोनेत्यपि प्रयोगापत्तेः। नचैवं घटादन्यः पट इत्यत्र कथमन्योन्याभावप्रतीतिरिति वा
च्यं। अन्यत्वस्यापि पृथक्त्वरूपत्वात्। संयोगस्त्रिविधः। अन्यतरकर्मजः। उभयक
र्मजः। संयोगजश्च। आद्यो यथा मनःकर्मणा आत्ममनसोः संयोगः। द्वितीयो य
था मेषयोः कर्मणा तयोः संयोगः। तृतीयो यथा। कारणाकारणसंयोगात् कार्या
कार्ययोः संयोगः। हस्ततरुसंयोगात् कायतरुसंयोगः॥ विभागस्त्रिविधः। अ
न्यतरकर्मजः उभयकर्मजः। विभागजश्च। आद्यो यथा मनःकर्मणा आत्ममन

सोर्विभागः। द्वितीयो यथा मेषयोः कर्मणा तयोर्विभागः। विभागजविभागो द्विवि
धः कारणमात्रविभागजः कारणाकारणविभागजश्च। आद्यो यथा। कपालक
र्मणा कपालद्वयविभागः ततः कपालद्वयसंयोगनाशः ततो घटनाशः ततः कपा
लस्याकाशात् विदेशात् विभागजो विभागः। नच विभागः स्वोत्पत्त्यनन्तरमेव वि
भागजविभागं जनयत्विति वाच्यं। द्रव्यनाशसहकृतस्यैव तस्य जनकत्वात्।
द्रव्यस्य प्रतिबंधकत्वेन सति द्रव्ये तदसंभवात्। नच कर्मैव एकदा कपालद्वय
विभागं आकाशकपालविभागं च जनयत्विति वाच्यं। यत् द्रव्यानारंभकसंयो
गविरोधिनं विभागमारभते न तत् द्रव्यारंभकसंयोगविरोधिनं यथा विक
सत्कुड्मलकमलदलकर्मेति व्याप्तेः। न च संयोगेप्येवमस्तु तत्राविरोधा
त्। द्वितीयस्तु कारणाकारणविभागात्कार्याकार्यविभागः करतरुविभा

णात् कार्यनाशः विभागः। परत्वापरत्वोत्पत्तिः कालप्रकरणे उक्ता। बुद्धिर्ज्ञानं तद्द्विविधं। स्मरणमनुभ
वश्च। स्मरणं द्विविधं यथार्थमयथार्थं च। तद्वति तत्प्रकारकत्वं यथार्थत्वं। तदभाववति तत्प्रकार
कत्वमयथार्थत्वं। पूर्वानुभवः संस्कारद्वारा स्मरणं जनयति। तत्र पूर्वानुभवस्य यथार्थत्वायथा
र्थत्वाभ्यां स्मरणमुभयरूपं भवति। अनुभवो द्विविधः प्रमा अयथार्थश्च। तत्र प्रमा चतुर्वि
धा सा वक्ष्यते। अयथार्थज्ञानं चतुर्विधं संशयो विपर्ययः स्वप्नोऽनध्यवसायश्च। संशयो
यथा समानधर्मवद्धर्मिज्ञानविशेषादर्शनकोटिस्मरणैरयं स्थाणुर्वा पुरुषो वेति ज्ञानं ज
न्यते स संशयः॥ विपर्ययस्तु समानधर्मवद्धर्मिज्ञानविशेषादर्शनैककोटिस्मरणैः शुक्ता
विदं रजतमिति ज्ञानं जन्यते तत्र गुरुमते इदमित्यनुभवात्मकज्ञानं रजतमिति स्म
रणात्मकं तेन ग्रहणस्मरणात्मकं ज्ञानद्वयं न तु रजतत्वविशिष्टज्ञानमिदं अन्यस्या
न्यथाभानसामग्र्यभावात् प्रवृत्तिश्च स्वतन्त्रोपस्थितेष्टभेदाग्रहात् नैयायिकमते प्रव
र्तकं विशिष्टज्ञानं तेन भ्रमः सिध्यति। स्वप्नस्तु अननुभूतपदार्थस्मरणे दृष्टेन धातुदोषेण ॥८॥

जन्यते। अनध्यवसायश्च किंचिदिति ज्ञानं विशेषादर्शनाद्भवति। अत्र यद्यपि निर्विकल्पस्याप्तदानिर्धर्मः
स्यादिति तर्को विपर्ययेऽन्तर्भाव्यो बोध्यः। तत्र नैयायिकमते स्वप्नानध्यवसायौ विपर्ययेऽन्तर्भाव्यौ प्रविष्टौ
तेन तन्मते अयथार्थज्ञानं द्विविधं संशयो विपर्ययश्च। सुखं धर्मजन्यं। दुःखमधर्मजन्यं।
इच्छा इष्टसाधनताज्ञानजन्या। द्वेषो द्विष्टसाधनत्वज्ञानजन्यः। कृतिस्त्रिविधा। जीवन
योनियत्नरूपा प्रवृत्तिर्निवृत्तिश्च। आद्या जीवनादृष्टजन्या द्वितीया इच्छाजन्या तृतीया
द्वेषजन्या। धर्मः श्रुतिविहितकर्मजन्यः अधर्मः श्रुतिविरुद्धाचरणजन्यः वेगाख्यः सं
स्कारः आद्यक्रियाजन्यो द्वितीयादिक्रियाजनकः यथा वेगेन बाणश्चलति भावनाख्यः
संस्कारो विशिष्टज्ञानजन्यः स्थितिस्थापकाख्यः कारणप्रक्रमजन्यः। गुरुत्वं कारण
गुरुत्वजन्यं। नैमित्तिकद्रवत्वं जतुघृतसुवर्णादीनामग्निसंयोगजन्यं। स्नेहः कारण
गुणप्रक्रमजन्यः। शब्दस्त्रिविधः। संयोगजो विभागजः शब्दजश्च। आद्यो भेरीदण्डसंयो
गजन्यः। द्वितीयो वंशादिदलद्वयविभागजन्यः। तृतीयस्तु संयोगेन विभागेन वा॥

आद्ये शब्दे जनिते तेन शब्देन निमित्तवायुसहकृतवीचितरंगन्यायेन कदंबगोलकन्या
येन वा जन्यते ॥ उत्क्षेपणाकुंचनप्रसारणगमनानि पंच कर्माणि । उत्क्षेपणादीनि जातयः ।
पृथिवीजलतेजोवायुमनोवृत्तीनि कर्माणि । सर्वाण्यनित्यानि । अतींद्रियवृत्तीन्यतींद्रि
याणि प्रत्यक्षवृत्तीनि प्रत्यक्षाणि ॥ अथ कर्मप्रक्रिया । संयोगेन नोदनाख्येनाद्यक
र्म जन्यते । द्वितीयादि वेगजन्यं क्रियातो विभागः । विभागात्पूर्वसंयोगनाशः ततः
कर्मविभागयोर्नाशः । सामान्यं त्रिविधं व्यापकं व्याप्यं व्याप्यव्यापकं च । व्यापकं स
त्ताव्याप्यं घटत्वादि द्रव्यत्वादि व्याप्यव्यापकं च । व्यक्तेरभेदस्तुल्यत्वं संकरोऽथान
वस्थितिः ॥ रूपहानिरसंबंधो जातिबाधकसंग्रहः ॥१॥ नित्यत्वे सत्यनेकसमवेत
त्वमिति सामान्यलक्षणं सामान्यानि नित्यान्येव । अतींद्रियवृत्तीन्यतींद्रियाणि । प्र
त्यक्षवृत्तीनि प्रत्यक्षाणि । नित्यद्रव्यवृत्तयो विशेषास्त्वनंता एव ते च वह्नौ नित्याः अ
तींद्रियाश्च प्रलये परमाणूनां भेदाय ते स्वीक्रियंते तेषां वैधर्म्यं व्याप्यत्वादिति । स्वस

बंधभिन्नो नित्यः संबंधः समवायः तेन स्वरूपसंबंधस्य ~~[illegible]~~स्य निरासः । इह घटे घटत्वमिति
प्रतीतिस्तत्र प्रमाणं नैयायिकमते समवायः प्रत्यक्षः स च × योग × नित्यश्च । न तस्यान्यपि अंधकार
सुवर्णादीनि संति द्रव्याणि । आलस्यादयो गुणा अपि संति कथं नवैवेत्यादि मेवम् अंधकारो
न द्रव्यं किंतु तेजोऽभावः सुवर्णं तेज एव । आलस्यं कृत्यभावः एवमन्यदपि बोध्यं । अभावो
द्विविधः । संसर्गाभावोऽन्योन्याभावश्च । आद्यस्त्रिविधः प्रागभावो ध्वंसोऽत्यंताभावश्च ।
प्रागभावो विनाशी अजन्यः । ध्वंसो जन्यो विनाशी । अत्यंतान्योन्याभावौ अजन्यावविना
शिनौ योग्यानुपलब्ध्याऽभावप्रत्यक्षः अन्यत्र त्वतींद्रियः ॥ ॥ अथ प्रमा कथ्यते । सा च चतु
र्विधा । प्रत्यक्षानुमित्युपमितिशाब्दरूपा तत्कारणानि प्रमाणानि चत्वारि । प्रत्यक्षानु
मानोपमानशब्दभेदात् । तत्र प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकं च प्रत्यक्षका
रणानि षडिंद्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि । एतानि संनिकर्षसहितानि

त्वज्ञानं जनयंति सन्निकर्षश्च लौकिकोऽलौकिकश्च अलौकिकस्त्रिविधः ज्ञानलक्ष-
णसामान्यलक्षणयोगजधर्मश्च लौकिकः षड्विधः संयोगः संयुक्तसमवायः संयुक्त-
समवेतसमवायः समवायः समवेतसमवायः विशेषणता चेति। संयोगेन द्रव्यप्र-
त्यक्षः। संयुक्तसमवायेन द्रव्यसमवेतगुणकर्मद्रव्यत्वजातीनां प्रत्यक्षं। संयुक्तसमवेतसमवायेन
द्रव्यसमवेतजातीतरगुणत्वकर्मत्वजातिः कर्म x तिजा x वृत्तिजातीनां प्रत्यक्षं। समवायेन शब्दस्य।
समवेतसमवायेन शब्दवृत्तिजातेः। विशेषणतया अभावस्य समवायस्य च। अलौकिक-
स्य यथा ज्ञानलक्षणया सुरभिचंदनमिति चाक्षुषज्ञानं सामान्यलक्षणया घटत्वेन
रूपेण यावद्घटज्ञानं योगजधर्मेण योगिनां सर्वज्ञानं। तच्च निर्विकल्पकं विशिष्टप्रकारा-
दिरहितं वस्तुस्वरूपमात्रज्ञानं। सविकल्पकं सप्रकारकं भासमानवैशिष्ट्यप्रतियोगित्व-
प्रकारत्वं यथायं घट इत्यत्रायं विशेष्यः घटत्वं प्रकारः भासमानवैशिष्ट्यमेतयोः समवायः
तस्य प्रतियोगि घटत्वं। सविकल्पकमेव विशिष्टवैशिष्ट्यज्ञानं यथायं दंडी अत्र दंडत्वविशिष्टस्य वैशि-

ष्ट्यं पुरुषे भासते॥ ॥अथ प्रक्रिया॥ चक्षुरिंद्रियसन्निकर्षात् घटघटत्वे इति निर्विकल्पकं ततोऽयं घट
इति विशिष्टज्ञानं तत्र परतःप्रामाण्यग्रह इति नैयायिकाः यथादौ घट इति व्यवसायः ततो घटमहं जा-
नामीत्यनुव्यवसायः ततः प्रामाण्याप्रामाण्य इति कोटिद्वयस्मरणं अथ च तदर्थे इदं ज्ञानं प्रमा
न वेति प्रामाण्यसंशयः ततो विशेषदर्शनानंतरं प्रामाण्यग्रहः इदं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात्
ज्ञानांतरवत् स्वतःप्रामाण्यग्रह इति प्रायो मीमांसकाः। तत्र गुरुमते अयं घट इति ज्ञानेन विषय आ-
त्मा ज्ञानं प्रामाण्यं च गृह्यते। मुरारिमिश्रमते अयं घट इति ज्ञानानंतरं घटमहं जानामीत्यनुव्य-
वसायः तेनैव प्रामाण्यग्रहः। भट्टमते ज्ञानस्यातींद्रियत्वेन ज्ञानमनुमेयं यथा तथा भवत्येव प्रामाण्य
यथाऽयं घट इति ज्ञानानंतरं घटे ज्ञातता उत्पद्यते ज्ञातो मया घट इति ज्ञातता प्रत्यक्षं। ततो व्या-
प्त्यादिप्रत्यक्षानंतरं ज्ञानानुमानं यथाहं घटत्वप्रकारकज्ञानवान् घटत्वप्रकारकज्ञाततावत्त्वा-
त् तेनैव तस्य धर्मधर्मिविषयकत्वेन प्रामाण्यानुमानं। अनुमितिकरणमनुमानं अनुमि-
तिमितित्वं जातिः। व्यापारवत्कारणं करणं। व्यापारश्च तज्जन्यत्वे सति तज्जन्यजनकः हेतुज्ञाना-
दिकरणं परामर्शो व्यापारः। परामर्शश्च व्याप्तिविशिष्टपक्षधर्मताज्ञानं यथा वह्निव्याप्य

धूमवानयमिति ॥ आदौ महानसादौ धूमवह्निसामानाधिकरण्यग्रहे सति धूमो वह्निव्याप्य इत्येव
म्बोधो जायते ततः कालान्तरे पर्वते धूमे दृष्टे सति व्याप्तिस्मरणं ततश्च विशिष्टवैशिष्ट्यज्ञानं वह्नि
व्याप्यधूमवानयमिति तृतीयलिङ्गपरामर्शः पक्षतासहितेन तेन पर्वतो वह्निमानित्यनुमितिर्ज
न्यते। व्याप्तिश्च हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिक
रण्यं न चायं संयोगवान् द्रव्यत्वादित्यत्र व्याप्तिः प्रतियोगिव्यधिकरणहेतुसमाना
धिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यमित्यर्थात् पक्षता च सिषाधयि
षाविरहसहकृतसिद्ध्यभावः। अनुमानं द्विविधं स्वार्थं परार्थं च। तत्र परार्थं पंचावय
साध्यं अवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि। यथा। पर्वतो वह्निमान्
धूमात् यत्र यत्र धूमः तत्र तत्र वह्निः यथा महानसं वह्निव्याप्यधूमवानयं तस्माद्वह्निमा
न् स्वार्थे च स्वीयव्याप्यादिना साध्यान्तत्र परप्रतिपत्त्यर्थमेनाहु...। ...प्रयोगः। तच्चानुमा
त्रिविधं केवलान्वयि केवलव्यतिरेकि अन्वयव्यतिरेकिभेदात्। यत्र साध्यव्यतिरेको न कुत्रा

॥१०॥

२४

व्याप्तिः स केवलान्वयि। यथा घटोऽभिधेयः प्रमेयत्वादित्यत्राभिधेयत्वस्य साध्यस्य व्यतिरेकाप्रसि
द्धिः। यत्र साध्यप्रसिद्धिः पक्षातिरिक्ते नास्ति स केवलव्यतिरेकि। यथा पृथिवीतरेभ्यो भिद्यते पृथि
वीत्वात् यत्रेतरभेदाभावः तत्र पृथिवीत्वाभावः यथा जलादि। व्यतिरेकव्याप्तौ तु साध्याभावो व्या
प्यः। हेत्वभावो व्यापकः। सोऽन्वयव्यतिरेकी। यत्र साध्यसाध्याभावश्चान्यत्र प्रसिद्धः। यथा पर्वतो
वह्निमान् धूमादित्यन्वयव्यतिरेकिणो हेतोः अवश्यं पंचरूपोपपन्नतापेक्षणीया। पक्षसत्त्वं
सपक्षसत्त्वं। विपक्षव्यावृत्तत्वमबाधितत्वं असत्प्रतिपक्षत्वं चेति पंचरूपाणि। केवलान्वयिनि
विपक्षव्यावृत्तत्वरहितं केवलव्यतिरेकिणि सपक्षसत्त्वरहितं च तद्रूपमेवापेक्षितं। यत्र
साध्यसंदेहः स पक्षः। यत्र साध्यनिश्चयः स सपक्षः। यत्र साध्याभावनिश्चयः स विपक्षः।
साध्याभावे ज्ञाते न पक्षो बाधः। साध्यविरोधिसाधकहेतुः प्रतिपक्षः। सोपाधौ पक्षसत्त्वा
त् अन्यतरभंग आवश्यकः सोपाधिश्च व्यभिचारितासंबंधेन उपाधिविशिष्टः। उपाधिश्च
द्विविधः। साधनाव्यापकत्वे सति च साध्यव्यापकः। साधनाव्यापकत्वे सति पक्षधर्म

वछिन्नसाध्यव्यापकः । साधनाव्यापकत्वे सति साध्यमात्रवछिन्नसाध्यव्यापकश्च । आद्यो यथा अयो
११ गोलकं धूमवत् वन्हेः आर्द्रेंधनप्रभववन्हिमात्रमुपाधिः । साधनाव्यापकत्वे सति शुद्धसाध्यव्या
पकः । द्वितीयो यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् अत्र बहिर्द्रव्यप्रत्यक्षत्वावछिन्नप्रत्य
क्षत्वस्य साध्यस्य व्यापकमुद्भूतरूपवत्वमुपाधिः । तृतीयो यथा ध्वंसो विनाशी जन्यत्वात् अत्र
जन्यत्वावछिन्नविनाशित्वव्यापकं भावत्वमुपाधिः ॥ ॥ अथ हेत्वाभासाः कथ्यंते ॥ सव्यभि
चारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंच हेत्वाभासाः । सव्यभिचारस्त्रिविधः । साधारणासा
धारणानुपसंहारिभेदात् । साध्याभाववद्वृत्तित्वं साधारणत्वं यथा धूमवत् वन्हेः
सकलसपक्षव्यावृत्तत्वमसाधारणत्वं यथा पर्वतो वन्हिमान् पर्वतत्वात् । सर्वपक्षकत्वमनु
पसंहारित्वं यथा सर्वं प्रमेयं अभिधेयत्वात् । साध्याभावव्याप्तो हेतुः विरुद्धः यथा घटो नि
त्यः सावयवत्वात् सत्प्रतिपक्षो यथा पर्वतो वन्हिमान् धूमात् पर्वतो वन्ह्यभाववान् महा
नसान्यत्वात् । असिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्च ॥ पंचे राम
१०

पक्षो ; सन् सिद्धसाधनं वा स आश्रयासिद्धः । यथाश्वविषाणं नित्यं अजन्यत्वात् नारीरंह
स्तादिमत् हस्तादिमत्तया प्रतीयमानत्वात् । यत्र पक्षावृत्तिर्हेतुः स स्वरूपासिद्धः ।
यथा पर्वतो वन्हिमान् महानसत्वात् । स च विशेषणासिद्धः विशेष्यासिद्धभागा
सिद्धभेदाद्बहुविधः । आद्यो यथा शब्दो नित्यः चाक्षुषे सति जन्यत्वात् द्विती
यो यथा शब्दो नित्यः गुणत्वे सति परमाणुवृत्तित्वात् तृतीयो यथा एतानि द्रव्या
णि निरवयवत्वात् ॥ बाधो यथा उष्णो ह्रदो वन्हिमान् द्रव्यत्वात् तेनैतद्दोष
रहितो हेतुः सद्धेतुः ॥ ॥ उपमितिकरणमुपमानं । कीदृशो गवय इति प्रश्ने गोसदृशो गवय
इत्युत्तरिते यदा गोसदृशं प्राणिनं पश्यति तदा पूर्वोक्तवाक्यार्थस्मरणानंतरं अयं गवयपदवाच्य इति धी
रूपा सा उपमितिः ॥ ॥ आप्तोक्तः शब्दः प्रमाणं । प्रकृतवाक्यार्थगोचरयथार्थज्ञानवानाप्तः पदज्ञा
नं करणं पदार्थोपस्थितिर्व्यापारः । आकांक्षायोग्यताऽऽसत्तितात्पर्यज्ञानानि सहकारीणि फलं शा
ब्दबोधः ॥ स्वरूपयोग्यत्वे सत्यनितान्वयबोधजनकत्वमाकांक्षा । तेन घटः कर्मत्वमानयनं कृ

तिरित्यत्र नान्वयबोधः स्वरूपायोग्यत्वात् । अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यत्र राज्ञः पुरुषपदासत्तिना-
न्वयबोधः । पुत्रेणैव जनितान्वयबोधकत्वात् । बाध्यकप्रमाविरहो योग्यता । तेन वह्निना सिंचती-
त्यत्र नान्वयबोधः अयोग्यत्वात् । अव्यवधानेनान्वयप्रतियोग्युपस्थितिरासत्तिः । तेन गिरिर्भु-
क्तो वह्निमान्देवदत्तेनेत्यत्र नान्वयबोधः । तत्तदर्थप्रतीतीच्छयोच्चरितत्वं तात्पर्यं तेन भोजनप्र-
करणे सैन्धवमानयेत्युक्ते अश्वान्वयबोधो न भवति । वृत्त्याविनाशब्देनान्वयबोधो जन्य-
ते ॥ वृत्तिर्द्विधा । शक्तिर्लक्षणा च । शक्तिर्घटादिपदस्य घटादौ । लक्षणा यथा गंगायां घोषः प्रतिव-
सतीत्यत्र गंगापदार्थप्रवाहे घोषवासान्वयानुपपत्त्या गंगापदस्य तीरे लक्षणा कल्प्यते । त-
या वृत्त्या उपस्थिते तीरे घोषः प्रतिवसतीत्यन्वयबोधो भवति । गौणी वृत्तिरपि लक्षणैव । यथा अ-
ग्निर्माणवक इति गौणी ह्येकः । अत्र लक्षणया अग्न्यादिसादृश्यं प्रतीयते ॥ शक्तं पदं चतुर्विधं । यौगिकं
रूढं योगरूढं यौगिकरूढं च । आद्यं यथा पाचकादिपदं योगार्थेन पाककर्त्रादिशक्तं । द्वितीयं य-
था विप्रादिपदं रूढिपदं ब्राह्मणवाचकं । तृतीयं पंकजादिपदं योगरूढ्या पंकजनिकर्तृत्वेन पद्म-
त्वेन च पद्मवाचकं । चतुर्थं यथा उद्भिदादिपदं यौगिकरूढ्या अंकुरवाचकं । ॥ लक्षणा द्विधा जह- १२

राम
१०

त्स्वार्था अजहत्स्वार्था च । आद्या यथा गंगायां घोषः इत्यादौ । द्वितीया स[illegible]गच्छतीत्यत्र ग्रामकर्मकग-
मनजनककृतिमानित्यन्वयबोधः । द्वितीयायाः अर्थः कर्मत्वं धातोर्गमनजनकत्वं सं-
सर्गमर्यादया लभ्यं लटो वर्त्तमानत्वं आख्यातस्य कृतिस्तत्संबंधः संसर्गमर्यादा [illegible] ग्रां-
तीत्यादौ अत्र द्वितीयान्तादितरस्यापि गमनमान्वयः । अयं शाब्दबोधप्रक्रिया ॥ देवदत्तो ग्रामं गच्छती-
त्यत्र ग्रामकर्मकगमनजनकवर्त्तमानकृतिमानित्यन्वयबोधः । द्वितीयायाः अर्थः कर्मत्वं लभ्यः
पचकर्तरि कृते बोधस्तत्राख्यातस्य व्यापारादौ लक्षणा । यथा रथो गच्छतीत्यत्र गमनजनकवर्त्तमान-
व्यापारवानर्थः । दधि पचेत्यादौ द्वितीयालोपस्थले दधिशब्द एव अजहत्स्वार्थलक्षणया दधि-
कर्मत्वं चोपस्थापयति । एकवचनाद्युपस्थितमेकत्वादि सर्वत्र प्रथमादिपदमुपस्थापयति । दे-
वदत्तेन गम्यते ग्राम इत्यस्य देवदत्तवृत्तिकृतिजन्यगमनजन्यफलशाली ग्राम इत्यर्थः । वृत्ति-
त्वं संसर्गबलल्लभ्यं । तृतीयार्थः कृतिः जन्यत्वं संसर्गः गमनं धात्वर्थः जन्यत्वं संसर्गः फल-
कर्म आत्मनेपदार्थः । शालित्वं संसर्गः । भावप्रत्यये तु देवदत्तेन सुप्यते इत्यस्य देवदत्तवृत्तिकृ-
तिजन्यः स्वाप इत्यर्थः । भावप्रत्ययस्थले फलाभावादात्मनेपदार्थो न भासते भविष्यत्वं लृटोर्थः ।

३ ७० स्वर्गकामो यजेतेत्यादौ कृतिसाध्यत्वबलवदनिष्टाजनकेष्टसाधनत्वं यागः ।५
। तत्र विद्यमानप्रागभावप्रतियोग्युत्पत्तिकत्वं तिनागमिष्यतीत्यत्र विद्यमानप्रागभावप्रतियोग्युत्पत्ति
कागमनानुकूलकृतिमानित्यर्थः । लुटोऽर्थः अनद्यतनत्वमपि । लुङोऽर्थः उत्पत्तिर्भूतत्वं च भूतत्व
मतीतत्वं तच्चोक्तं तावन्त्वेति । तथा च विद्यमानध्वंसप्रतियोग्युत्पत्तिकत्वं लङ्थः । लिटो
पि परोक्षत्वमतीतत्वं चार्थः । तदन्वयः पूर्ववदुत्पत्तौ लङो ऽनद्यतनत्वमतीतत्वं चार्थः
विधिलिङोऽर्थः कृतिसाध्यत्वे सति बलवदनिष्टाजनकेष्टसाधनत्वं स्वर्गकामो य
जेतेत्यर्थः । आशीर्लिङो लोटोऽर्थः । वक्त्रिच्छाविषयत्वं । तेन घटमानयेत्यत्र घटकर्मकमदिच्छा
विषयानयनानुकूलकृतिमांस्त्वमित्यन्वयः । व्याप्यक्रियया व्यापकक्रियायाः आ
पादने लृङोऽर्थः । तात्पर्यवशात् क्वचिद् भूतत्वं क्वचिद् भविष्यत्त्वं लृङा बोध्यते । सनः कृ
रिच्छार्थः सनुत्तराख्यातस्याश्रयत्वे लक्षणा । सविषयकार्थकप्रकृतिकाख्यातस्य
लक्षणया ऽपाश्रयत्वे घटं जानातीत्यादौ स्वोक्तत्वात् । घञोऽर्थः । पौनःपुन्यं तत्त्वं च
तदानीतनप्रकृत्यर्थसजातीयक्रियान्तरध्वंसकालीनत्वे सति वर्तमानादि

॥ कृतिविषयत्वं पापच्यत इत्यादौ तादृशकालीनत्वमेव यङः प्रत्यापत्तेः । आख्यातस्य
वर्तमानवाचकत्वात् । न विशिष्टवाचकत्वं यङः तदानीतनत्वं चेत्स्थूलकालमादाय पूर्व
कालीनत्वं केनचित् क्त्वार्थः । पूर्वत्वं च समभिव्याहृतक्रियापेक्षं बोध्यं तत्पूर्वकाली
नत्वे तत्प्रागभावकालवृत्तित्वे तदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वं
वा तेन भुक्त्वा व्रजतीत्यत्र गमनप्रागभावावच्छिन्नकालवृत्तिभोजनकर्त्रभिन्नो
व्रजतीत्यर्थः । समानविभक्तिकत्वेनाभेदेन धर्मिवाचकत्वात् । अव्ययत्वेन क्त्वा परविभ
क्तिलोपात् कालः तात्पर्यवशात् । व्यवहिताव्यवहितसाधारणो बोध्यः । तेन पू
र्वच्छिन्नदेशत्वोपलक्षितच्छिन्नदेशसमागत इत्यत्र तादृशप्रयोगागमः । इच्छावान् तुमो
ऽर्थः । भोक्तुं व्रजतीत्यस्य भोजनेच्छावान् व्रजतीत्यर्थः । भोक्तुमिच्छतीत्यत्र कर्तरि ल
क्षणा भोजनकर्तारमात्मानमिच्छतीत्यर्थः । सति विशेषणे हीति न्यायात् विशेषणे
कृता विध्यन्वयः । प्रकृतधात्वर्थं कृतीरात्वकर्तृत्वेनान्वयो धात्वर्थजन्यफलेनान्

तर्का०

कर्मत्वज्ञानं बोधः। शत्रादीनां कर्त्राद्यर्थः। सविषयप्रकृतिकानां त्वाश्रयत्वे लक्षणा। एवं कर्तृ-
कर्मकृतां तेन सूत्रेण कर्तृकर्मणी वाच्ये। भावकृतां क्तल्युट्तुमुनादीनां प्रयोगसाधुत्व-
मात्रं। धात्वर्थातिरिक्तस्य भावकृतानुपस्थानादिति। ननु नीलं घटमानयेत्यादौ
द्वितीयाद्वयश्रवणात् कर्मद्वयबोधापत्तिः। ननु विशिष्टस्य कर्मत्वमिति चेत् तत्र विशे-
षणविभक्तिः साधुत्वाय। अथवा विशेषणविभक्तेरभेदोऽर्थः। अत्रायं विशेषः द्विती-
यपक्षे वाक्यसमासयोः पर्यायता न घटते वाक्ये नीलं घटमित्यादौ अभेदस्य पदार्थ-
त्वेन प्रकारत्वान्न संसर्गत्वं। नीलघटमित्यादौ कर्मधारये लक्षणाया अस्वीकारेण
भेदस्य पदार्थत्वेन संसर्गत्वात्। तथा च। वाक्यसमासयोः पर्यायत्वानुरोधेन
षष्ठीसमासे राजपुरुष इत्यादौ षष्ठ्यर्थसंबंधलक्षणा न घटते संबंधस्य संसर्गम-
र्यादालभ्यत्वात्। वस्तुतस्तु विरुद्धविभक्त्यनवरुद्धस्याभेदबोधकत्वव्युत्पत्तेः। राम
मुख्यार्थराजाभेदस्य बाधेन राजपदस्य राजसंबंधिनि लक्षणा। एवं बहुव्रीहौ चरम- १५॥

पदस्यान्यपदार्थे लक्षणा। तथा च द्वंद्वकर्मधारयान्यसमासे सर्वत्र तत्तदर्थे ल-
१५ क्षणा। एवं नञोऽर्थोऽभावः। अघटं भूतलमित्यादौ घटभिन्ने लक्षणा। न कलंजं भ-
क्षयेदित्यादौ बलवदनिष्टजनके लक्षणा। क्रियासंगतस्यैवकारस्यात्यन्ता-
योगव्यवच्छेदोऽर्थः। यथा नीलं सरोजं भवत्येव। विशेषणसंगतस्यायोगव्यवच्छेदः
यथा शंखः पाण्डुर एवेति। विशेष्यसंगतस्यान्ययोगव्यवच्छेदः पार्थ एव धनुर्ध-
र इत्यादौ। एवं दिशा सर्वं बोध्यमिति॥ ॥इति जगदीशविरचितं तर्कामृतं
समाप्तं॥ ॥श्रीरस्तु॥

॥१९